# ॥ વરાહસ્તોત્રમ્ ॥

.. varAhastotram ..

sanskritdocuments.org

September 11, 2017

# .. varAhastotram ..

# ॥ વરાહસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : varAhastotram

File name : varAhastotram.itx

Category : vishhnu, dashAvatAra, stotra, vyAsa

Location : doc_vishhnu

Author : Maharshi Vyas in Bhagavat Purana

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, NA

Description-comments : From Bhagavatapurana, 3.13.35-3.13.46

Latest update : July 12, 2012

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

શ્રી ગણેશાય નમઃ ॥ ઋષય ઊચુઃ ॥

જિતં જિતં તેऽજિત યજ્ઞભાવના ત્રયીં તનું સ્વાં પરિધુન્વતે નમઃ ।
યદ્રોમગર્તેષુ નિલિલ્યુરધ્વરાસ્તસ્મૈ નમઃ કારણસૂકરાય તે ॥ ૧॥

રૂપં તવૈતન્નનુ દુષ્કૃતાત્મનાં દુર્દર્શનં દેવ યદધ્વરાત્મકમ્ ।
છન્દાંસિ યસ્ય ત્વચિ બર્હિરોમસ્વાજ્યં દૃશિ ત્વઙ્ઘ્રિષુ ચાતુર્હોત્રમ્ ॥ ૨॥

સ્રુક્તુણ્ડ આસીત્સ્રુવ ઈશ નાસયોરિડોદરે ચમસાઃ કર્ણરન્ધ્રે ।
પ્રાશિત્રમાસ્યે ગ્રસને ગ્રહાસ્તુ તે યચ્ચર્વણં તે ભગવન્નગ્નિહોત્રમ્ ॥ ૩॥

દીક્ષાનુજન્મોપસદઃ શિરોધરં ત્વં પ્રાયણીયોદયનીયદંષ્ટ્રઃ ।
જિહ્વા પ્રવર્ગ્યસ્તવ શીર્ષકં ક્રતોઃ સભ્યાવસથ્યં ચિતયોऽસવો હિ તે ॥ ૪॥

સોમસ્તુ રેતઃ સવનાન્યવસ્થિતિઃ સંસ્થાવિભેદાસ્તવ દેવ ધાતવઃ ।
સત્રાણિ સર્વાણિ શરીરસન્ધિસ્ત્વં સર્વયજ્ઞક્રતુરિષ્ટિબન્ધનઃ ॥ ૫॥

નમો નમસ્તેऽખિલયન્ત્રદેવતાદ્રવ્યાય સર્વક્રતવે ક્રિયાત્મને ।
વૈરાગ્યભક્ત્યાત્મજયાનુભાવિતજ્ઞાનાય વિદ્યાગુરવે નમો નમઃ ॥ ૬॥

દંષ્ટ્રાગ્રકોટ્યા ભગવંસ્ત્વયા ધૃતા વિરાજતે ભૂધર ભૂઃ સભૂધરા ।
યથા વનાન્નિઃસરતો દતા ધૃતા મતઙ્ગજેન્દ્રસ્ય સપત્રપદ્મિની ॥ ૭॥

ત્રયીમયં રૂપમિદં ચ સૌકરં ભૂમણ્ડલેનાથ દતા ધૃતેન તે ।
ચકાસ્તિ શૃઙ્ગોઢઘનેન ભૂયસા કુલાચલેન્દ્રસ્ય યથૈવ વિભ્રમઃ ॥ ૮॥

સંસ્થાપયૈનાં જગતાં સતસ્થુષાં લોકાય પત્નીમસિ માતરં પિતા ।
વિધેમ ચાસ્યૈ નમસા સહ ત્વયા યસ્યાં સ્વતેજોऽગ્નિમિવારણાવધાઃ ॥ ૯॥

કઃ શ્રદ્દધીતાન્યતમસ્તવ પ્રભો રસાં ગતાયા ભુવ ઉદ્વિબર્હણમ્ ।
ન વિસ્મયોऽસૌ ત્વયિ વિશ્વવિસ્મયે યો માયયેદં સસૃજેऽતિવિસ્મયમ્ ॥ ૧૦॥

વિધુન્વતા વેદમયં નિજં વપુર્જનસ્તપઃસત્યનિવાસિનો વયમ્ । var જયમ્
સટાશિખોદ્ધૂતશિવામ્બુબિન્દુભિર્વિમૃજ્યમાના ભૃશમીશ પાવિતાઃ ॥ ૧૧॥

સ વૈ બત ભ્રષ્ટમતિસ્તવૈષ તે યઃ કર્મણાં પારમપારકર્મણઃ ।
યદ્યોગમાયાગુણયોગમોહિતં વિશ્વં સમસ્તં ભગવન્ વિધેહિ શમ્ ॥ ૧૨॥

ઇતિ શ્રીમદ્ભાગવતપુરાણાન્તર્ગતં વરાહસ્તોત્રં સમ્પૂર્ણમ્ ॥

From Bhagavatapurana, 3.13.35-3.13.46
Proofread by Dinesh Agarwal dinesh.garghouse at gmail.com, NA

.. varAhastotram ..

Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996
on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*